श्रीकामाक्षीस्तोत्रम् ३

{॥ श्री कामाक्षीस्तोत्रम् ३ ॥}

कल्पानोकहपुष्पजालविलसन्नीलालकां मातृकां

कान्तां कञ्जदलेक्षणां कलिमलप्रध्वंसिनीं कालिकाम् ।

काञ्चीनूपुरहारदामसुभगां काञ्चीपुरीनायिकां

कामाक्षीं करिकुम्भसन्निभकुचां वन्दे महेशप्रियाम् ॥ १॥

काशाभांशुकभासुरां प्रविलसत्कोशातकीसन्निभां

चन्द्रार्कानललोचनां सुरुचिरालङ्कारभूषोज्ज्वलाम् ।

ब्रह्मश्रीपतिवासवादिमुनिभिः संसेविताङ्घ्रिद्वयां

कामाक्षीं गजराजमन्दगमनां वन्दे महेशप्रियाम् ॥ २॥

ऐं क्लीं सौरिति यां वदन्ति मुनयस्तत्त्वार्थरूपां परां

वाचां आदिमकारणं हृदि सदा ध्यायन्ति यां योगिनः ।

बालां फालविलोचनां नवजपावर्णां सुषुम्नाश्रितां

कामाक्षीं कलितावतंससुभगां वन्दे महेशप्रियाम् ॥ ३॥

यत्पादाम्बुजरेणुलेशं अनिशं लब्ध्वा विधत्ते विधिर्-

विश्वं तत् परिपाति विष्णुरखिलं यस्याः प्रसादाच्चिरम् ।

रुद्रः संहरति क्षणात् तद् अखिलं यन्मायया मोहितः

कामाक्षीं अतिचित्रचारुचरितां वन्दे महेशप्रियाम् ॥ ४॥

सूक्ष्मात् सूक्ष्मतरां सुलक्षिततनुं क्षान्ताक्षरैर्लक्षितां
वीक्षाशिक्षितराक्षसां त्रिभुवनक्षेमङ्करीं अक्षयाम् ।
साक्षाल्लक्षणलक्षिताक्षरमयीं दाक्षायणीं सक्षिणीं var साक्षिणीं
कामाक्षीं शुभलक्षणैः सुललितां वन्दे महेशप्रियाम् ॥ ५॥

ओङ्काराङ्गणदीपिकां उपनिषत्प्रासादपारावतीम्
आम्नायाम्बुधिचन्द्रिकां अधतमःप्रध्वंसहंसप्रभाम् ।
काञ्चीपट्टणपञ्जराऽऽन्तरशुकीं कारुण्यकल्लोलिनीं
कामाक्षीं शिवकामराजमहिषीं वन्दे महेशप्रियाम् ॥ ६॥

ह्रीङ्कारात्मकवर्णमात्रपठनाद् ऐन्द्रीं श्रियं तन्वतीं
चिन्मात्रां भुवनेश्वरीं अनुदिनं भिक्षाप्रदानक्षमाम् ।
विश्वाघौघनिवारिणीं विमलिनीं विश्वम्भरां मातृकां
कामाक्षीं परिपूर्णचन्द्रवदनां वन्दे महेशप्रियाम् ॥ ७॥

वाग्देवीति च यां वदन्ति मुनयः क्षीराब्धिकन्येति च
क्षोणीभृत्तनयेति च श्रुतिगिरो यां आमनन्ति स्फुटम् ।
एकानेकफलप्रदां बहुविधाऽऽकारास्तनूस्तन्वतीं
कामाक्षीं सकलार्तिभञ्जनपरां वन्दे महेशप्रियाम् ॥ ८॥

मायामादिम्कारणं त्रिजगतां आराधिताङ्घ्रिद्वयाम्
आनन्दामृतवारिराशिनिलयां विद्यां विपश्चिद्धियाम् ।

मायामानुषरूपिणीं मणिलसन्मध्यां महामातृकां

कामाक्षीं करिराजमन्दगमनां वन्दे महेशप्रियाम् ॥ ९॥

कान्ता कामदुघा करीन्द्रगमना कामारिवामाङ्कगा var कामदुहा

कल्याणी कलितावतारसुभगा कस्तूरिकाचर्चिता

कम्पातीररसालमूलनिलया कारुण्यकल्लोलिनी

कल्याणानि करोतु मे भगवती काञ्चीपुरीदेवता ॥ १०॥

इति श्रीमद् आदिशङ्कराचर्यविरचितं श्री कामाक्षीस्तोत्रं सम्पूर्णम् ।

Encoded and proofread by greenmesg.org nature.and.poetry gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

kamakshi Stotram 3 Lyrics in Devanagari PDF
% File name : kAmAkShIstotram3.itx
% Category : stotra
% Location : doc_devii
% Author : Adi Shankaracharya
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : nature.and.poetry gmail.com
% Proofread by : nature.and.poetry gmail.com
% Latest update : April 24, 2015
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%

% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 11, 2015] at Stotram Website